PS/UM-II/6/120-124/18

षष्ठपत्रम्

वेदः

समयः घण्टात्रयम् पूर्णाङ्काः 100

अ. सर्वे प्रश्नाः समाधेयाः। (20×2=40)

1. "नीलग्रीवाः" इति कस्य देवस्य विशेषणम्?
2. "रुद्राष्टाध्यायी" इति ग्रन्थस्य पञ्चमाध्यायस्य प्रथमः मन्त्रः कः?

अथवा

शुक्लयजुर्वेदस्य सम्प्रदायः कः?

3. को नाम वेदः?
4. वेदाङ्गाः कति सन्ति?
5. धनुर्वेदः कस्य वेदस्य उपवेदः अस्ति?

अथवा

यजुर्वेदस्य ऋत्विक् कः भवति?

6. "गिरीशः" इति कस्य देवस्य विशेषणम्?
7. "नमो रोहिताय" इति पदस्य कोऽर्थः?
8. सभापतिरूपेण कस्य देवस्य स्तुतिः विद्यते?
9. "स्वस्ति न इन्द्रो. . . . . .बृहस्पतिर्दधातु॥" इति मन्त्रं सस्वरं पूरयतु।

अथवा

सर्वविद्यानाम् ईश्वर: क: ?

10. पञ्चमुखशिवस्य पश्चिममुखस्य नाम किम् ?

11. गायत्रीमन्त्रं लिखत।

अथवा

"शिव:" इति पदस्य कोऽर्थ: ?

12. त्र्यम्बकं यजामहे. . . . . .माऽमृतात्॥ इति मन्त्रं पूरयतु।

13. रुद्रसूक्ते कति मन्त्रा: सन्ति ?

14. वेदस्य मुखं किमस्ति ?

अथवा

अध्वर्यु: कस्य वेदस्य ऋत्विक् भवति ?

15. प्रमुखा: हस्तस्वरा: के भवन्ति ?

16. कति विद्यास्थानानि ?

17. अनुदात्तस्वरस्य सङ्केत: क: ?

18. कस्मिन् वेदाङ्गे हस्तस्वराणां नियमा: सन्ति ?

19. रुद्राष्टध्यायीग्रन्थे कस्मिन् अध्याये 'रुद्रसूक्तम्' अस्ति ?

20. "त्र्यम्बकम्" इति पदस्य कोऽर्थ: ?

सर्वे प्रश्नाः समाधेयाः। (8×5=40)

21. "नमऽउष्णीषिणे. . . . .भ्यश्च वो नमः॥" इति मन्त्रं सस्वरं पूरयतु।

22. रुद्राष्टाध्यायीग्रन्थे वर्णितमहामृत्युञ्जयसंज्ञकं मन्त्रं सस्वरं लिखत।

अथवा

अग्निश्च हृदये. . . . .कोश्याभ्याम्॥ इति मन्त्रं सस्वरं पूरयतु।

23. प्राणश्चमे. . . . . .कल्पन्ताम्॥ इति मन्त्रं सस्वरं पूरयतु।

अथवा

रुद्राष्टाध्यायीग्रन्थस्य सप्तमोऽध्यायस्य मन्त्रत्रयं सस्वरं लिखत।

24. "नमोऽस्तु रुद्रेभ्यो. . . . . .दध्मः॥" इति मन्त्रं सस्वरं पूरयतु।

अथवा

"ऊर्क्क च मे. . . . . कल्पन्ताम्॥" इति मन्त्रं सस्वरं पूरयतु।

25. रुद्राष्टाध्यायीग्रन्थस्य शान्त्यध्यायस्य मन्त्रत्रयं सस्वरं लिखत।

स. **कश्चन एकः प्रश्नः समाधेयः।** (20×1=20)

26. रुद्राष्टाध्यायीग्रन्थस्य अष्टमाऽध्यायस्य कतिपयान् पञ्चमन्त्रान् सस्वरं लिखत।

**अथवा**

रुद्रसूक्तस्य दशमन्त्रान् सस्वरान् लिखत।

अथवा

# PS/UM-II/6/121/18

## षष्ठपत्रम्

## व्याकरणम्

समयः घण्टात्रयम् पूर्णाङ्काः 100

अ. अधोलिखितेषु सर्वे प्रश्नाः समाधेयाः। (2×20=40)

1. विभक्तिसंज्ञा कस्य भवति?
2. अयोगवाहाः के?
3. सन्निपातपरिभाषा कथम् अनित्या?
4. अङ्गसंज्ञा कस्य भवति?

अथवा

"ओसि च" इति सूत्रेण किं भवति?

5. अनुबन्धकृतम् अनेकालत्वं भवति न वा?
6. सर्वनामस्थानसंज्ञा केषां भवति?
7. भसंज्ञा कस्य भवति?
8. अपृक्तसंज्ञा कस्य भवति?
9. "आतो धातोः" सूत्रेण किं भवति?

10. षट्संज्ञा कस्य भवति?

अथवा

सखिशब्दस्य प्रथमाबहुवचने किं रूपम्?

11. "आटश्च" सूत्रेण किं भवति?

12. धातृणाम् इत्यत्र णत्वं केन भवति?

13. "स्त्रियाः" सूत्रेण किं भवति?

14. "टेः" सूत्रेण किं भवति?

अथवा

भष्भावः केन सूत्रेण भवति?

15. "दश्च" इति सूत्रेण किं भवति?

16. "अष्टाभ्य औश्" इति सूत्रस्य कोऽर्थः?

17. अङ्गकार्ये कृते पुनः अङ्गकार्यं भवति न वा?

अथवा

मे, नौ, नः, कस्य शब्दस्य रूपमस्ति?

18. "चौ" सूत्रेण किं भवति?

19. "नहो धः" इति सूत्रेण किं भवति?

20. अव्ययं किम्?

स.  एकः प्रश्नः समाधेयः। (1×20=20)

26. "सर्वनाम्नः स्याड्ढ्रस्वश्च" "विभाषा दिक्समासे बहुव्रीहौ" इति सूत्रद्वयं सोदाहरणं व्याख्यात।

अथवा

"अट्कुप्वाङ्नुम्व्यवायेऽपि" "पदान्तस्य" इति सूत्रद्वयं कौमुदीदिशा व्याख्यात।

अथवा

रामशब्दस्य सर्ववचनविभक्तिषु रूपं विलिख्य ससूत्रं सिद्धिं कुरुत।

अथवा

# PS/UM-II/6/122/18

## षष्ठपत्रम्

## साहित्यम्

समयः घण्टात्रयम् पूर्णाङ्काः 100

अ. सर्वे प्रश्नाः अतिलघूत्तरेण समाधेयाः। (20×2=40)

1. "काव्यालङ्कारसूत्राणि" कस्येयं रचना?
2. काव्यालङ्कारसूत्रस्य तुरीयम् अधिकरणं किम्?
3. "स दोषगुणालङ्कारहानादानाभ्याम्" अस्य किं तात्पर्यम्?
4. कति विद्या, काश्च ताः?

अथवा

पादयमकवत् कोऽलङ्कारः?

5. ते मे शब्दौ कस्मिन्नर्थे स्तः?
6. उपर्यादिषु सामीप्ये द्विरुक्तेषु का विभक्तिः?

अथवा

"यतिभ्रष्टम्" अस्य कोऽर्थः?

7. शब्दशुद्धिः कथं जायते?

अथवा

प्रसादार्थगुणस्य लक्षणं लिखत।

8. "प्रातिभम्" अत्र कः प्रत्ययः?

9. "निधानगर्भामिव सागराऽम्बराम्" कस्येदमुदाहरणम्?

10. पदार्थनिश्चयः कस्माद् भवति?

अथवा

अभियोगलक्षणं लिखत।

11. को विवित्तोः?

12. दशरूपकेषु किं श्रेयः?

13. "कुरङ्गीनेत्रालीस्तबकितवनालीपरिसरः" अत्र को गुणः?

अथवा

"मिलि" इत्यस्य का संज्ञा?

14. कतकं कस्मै नास्ति?

15. अवधानं नाम किम्?

16. "त एवार्थगुणाः" अत्र "त" पदेन किं बोध्यते?

17. "नियम्य" शब्दोऽयं साधु असाधु वा?

18. किं नाम गुप्तम्?

19. "काव्यालङ्कारसूत्राणि" पदस्यास्य व्युत्पत्तिं प्रदर्शयत।

20. "नराः शीलभ्रष्टा व्यसन इव मज्जन्ति तरवः" कस्येदमुदाहरणम्?

ब. सर्वे प्रश्नाः समाधेयाः। (5×8=40)

21. काव्यालङ्कारसूत्रस्य मङ्गलाचरणं सविस्तरेण प्रपञ्चयत।

अथवा

माधुर्यशब्दगुणमुदाहरणसहितं विशदयत।

22. काव्यफलानि ग्रन्थोक्तदिशा विवेचयत।

23. "देशकालस्वभावविरुद्धार्थानि लोकविरुद्धानि" अस्य भावो लेख्यः।

अथवा

अप्रस्तुतप्रशंसायाः लक्षणोदाहरणं लिखत।

24. "हानिवदाधिक्यमप्यङ्गानां विकारः" सूत्रमिदं स्पष्टयत।

25. भिन्नवृत्तदोषस्य लक्षणोदाहरणं लिखत।

अथवा

अनन्वयालङ्कारं लक्षणोदाहरणसहितं व्याख्येयम्।

स. **कश्चनैकः प्रश्नः समाधेयः।** (1×20=20)

26. दोषलक्षणं विलिख्य नेयार्थ गूढार्थयोः दोषयोः सोदाहरणं वर्णनं कुरुत।

अथवा

आचार्यवामनस्य जीवनपरिचयो लेख्यः।

अथवा

"रीतिरात्मा काव्यस्य" सविस्तरेण प्रपञ्चयत।

PS/UM-II/6/123/18

षष्ठपत्रम्

ज्योतिषम्

समयः घण्टात्रयम् पूर्णाङ्काः 100

अ. अतिलघूत्तरीयाः सर्वे प्रश्नाः समाधेयाः। (20×2=40)

1. बीजगणितं केन विरचितम्?

2. बीजगणितमिति पदे बीजं नाम किम्?

3. पाटीगणितं नाम किम्?

अथवा

−3 या + 2 या = ?

4. −5 या + 2 या = ?

5. + × − = ?

6. स्वर्णघाते किं स्यात्?

अथवा

अनन्तराशिः कः?

7. किन्नाम भावितम्?

8. अव्यक्तगणितं किम्?

9. अस्वयो: वध: क:?

10. खसंकलनव्यवकलनकरणसूत्रं लिखत।

11. चमत्कारचिन्तामणे: ग्रन्थस्य मङ्गलाचरणं लिखत।

12. "तीक्ष्णरश्मि:" इति कस्य ग्रहस्य संज्ञा?

13. जातक: कदा श्रोत्रहीनं भवति?

अथवा

विक्रमभाव: क:?

14. रवि: कस्मिन् भावे नेत्रदोषं करोति?

15. "शिखि:" इत्यस्य पदस्य कोऽर्थ:?

16. राहुपुच्छ: क:?

अथवा

शने: दशमभावस्य फलं किम् ?

17. चन्द्रस्य लग्ने फलं किम्?

18. भौमस्य चतुर्थभावे किं फलम्?

19. "पात" इति कस्य ग्रहस्य संज्ञा?

20. "विधु:" इति कस्य भावस्य संज्ञा?

अथवा

"समुद्रांगजेशं" कस्य संज्ञा?

ब. सर्वे प्रश्नाः समाधेयाः । (5×8=40)

21. धनर्णसंकलन - व्यवकलनकरणसूत्रे लिखत।

22. गुण्यः = क$^2$ − 8 क + 15 गुणकः = क$^2$+3क−5 इत्यनयोः गुणनफलं' किं स्यात्? ससूत्रं प्रतिपादयत।

अथवा

भाज्यः = क$^4$ + क$^3$ − 3 क$^2$ + 2 क + 1,

भाजकः = क$^2$ − 2 क + 1

तदा लब्धिः साधनं कुरु।

23. त्रयोदशगुणो वर्गस्त्रयोदशविवर्जितः।

त्रयोदशयुतो वा स्याद्वर्ग एव निगद्यताम्॥"

इति सम्यक्तया प्रतिपादयत।

अथवा

चन्द्रस्य लग्न-धन-सहज भावेषु फलानि कानि?

24. भौमस्य सुहृद-पुत्र-रिपुभावेषु फलं किम्?

25. जीवग्रहस्य षष्ठ-अष्टम-द्वादशभावेषु फलानि लिखत?

अथवा

शनिग्रहस्य त्रिकभावानां (6, 8, 12) फलानि लिखत।

द्वौ प्रश्नौ समाधेयौ। (2×10=20)

26. सूर्यस्य क्रमशः लग्नादिद्वादशभावेषु फलानि स्पष्टयत।

अथवा

शुक्रग्रहस्य क्रमशः लग्नादिद्वादशभावेषु फलानि स्पष्टयत।

27. द्वादशभावेषु रविस्थितफलं विवृणुत।

अथवा

त्रयोदशगुणो वर्गो निरेकः कः कृतिर्भवेत्।

को वाष्टगुणितो वर्गो निरेको मूलदो वद॥

इति प्रश्नस्य सम्यक्तया समाधानं कुरुत।

अथवा

# UM/PS-II/6/124/18

## षष्ठपत्रम्

## वेदान्तसारः (दर्शनम्)

समयः घण्टात्रयम् पूर्णाङ्काः 10(

अ. सर्वे प्रश्नाः समाधेयाः। (20×2=40)

1. वेदान्तसारः केन रचितः।

2. "ईहामुत्रार्थफलभोगविरागः" इत्यस्य अर्थं लिखत?

3. मनसः किं लक्षणम्?

4. शरीरं कतिविधम्?

अथवा

का नाम आवरणशक्तिः?

5. 'तत्त्वमसि' इत्यत्र 'त्वं' पदेन किं गृह्यते?

6. बुद्धेः किं लक्षणम्?

7. का नाम अविद्या?

8. को नाम विवर्तः? को नाम परिणामः?

अथवा

कानि ज्ञानेन्द्रियाणि ? कानि कर्मेन्द्रियाणि ? लिखत।

9. स्थूलशरीरं किम् ?

10. साधनचतुष्टयं किम् ? लिखत।

11. सृष्टिक्रमं लिखत।

12. वेदान्तो नाम किम् ?

अथवा

अनुबन्धचतुष्टयं किम् ?

13. "विरागः" इत्यस्य विग्रहवाक्यं किम् ?

14. को नाम शमः ?

15. का नाम श्रद्धा ?

16. 'दमः' इति कथनेन किमवगम्यते ?

अथवा

कानि पञ्चतन्मात्राणि ?

17. प्रपञ्चस्योपादानकारणं किम् ?

18. लिङ्गशरीरं कत्यवयवात्मकम् ?

19. जीवन्मुक्तस्य किं लक्षणम्?

20. अज्ञानोपहितचैतन्यमेवात्मा इति कस्य मतम्?

अथवा

जहदजहल्लक्षणायाः उदाहरणं देयम्।

ब. लघूत्तरीयप्रश्नाः।

सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः। (5×8=40)

21. शमदमादिषट्कसम्पत्तिं निरूपयत।

22. अज्ञानं तस्य शक्तिद्वयञ्च वर्णयत।

23. कः अधिकारी? वर्णयत।

अथवा

फलव्याप्ति-वृत्तिव्याप्त्योः स्वरूपं प्रकाशयत।

24. सविकल्पकसमाधिं निरूपयत।

अथवा

पञ्चीकरणप्रकारं प्रदर्शयत।

25. स्थूलप्रपञ्चं निरूपयत।

अथवा

उपनिषदामेव वेदान्तसंज्ञा इति स्पष्टीकुरुत।

स. एकस्य प्रश्नस्य दीर्घमुत्तरं लिखत। (1×20=20)

26. वेदान्तसारग्रन्थस्य परिचयं दत्वा पुत्रादीनामनात्मत्वं प्रतिपादयत।

अथवा

'तत्त्वमसि' इति महावाक्यं व्याख्यात।

अथवा

# PS/UM-II/6/124A/18

## षष्ठपत्रम्

## जैनदर्शनम्

समयः घण्टात्रयम् पूर्णाङ्काः 10

(परीक्षामुखसूत्रे प्रश्नाः)

अ. सर्वे प्रश्नाः समाधेयाः। (20×2=40

1. 'परीक्षामुखसूत्रम्' इत्यनेन किं तात्पर्यम्?
2. परीक्षामुखसूत्रस्य रचनाकालः कः?
3. परीक्षामुखसूत्रस्य कर्ता कः?
4. पदार्थानां निर्णयः कस्मात् जायते?
5. परीक्षामुखसूत्रे कति परिच्छेदाः सन्ति?
6. प्रमाणाभासात् किं जायते?
7. प्रमाणस्य किं लक्षणं प्रोक्तम्?
8. प्रत्यक्षप्रमाणस्य किं लक्षणम्।
9. ज्ञानमेव कथं प्रमाणं स्वीकृतम्?

10. सन्निकर्ष: किमुच्यते ?

11. अपूर्वार्थ: क: ?

12. समारोप: किमुच्यते ?

13. स्वव्यवसाय: क: ?

14. ज्ञानस्य स्वपरप्रकाशकत्वस्य उदाहरणं किं प्रदत्तम् ?

15. 'प्रामाण्यम्' इत्यनेन किं तात्पर्यम् ?

16. प्रमाणस्य प्रामाण्यनिर्णय: कथं जायते ?

अथवा

प्रमाणस्य द्वौ भेदौ कौ ?

17. वैशद्यं किमुच्यते ?

अथवा

कथं नार्थालोकौ ज्ञानस्य कारणं भवत: ?

18. सांव्यावहारिकप्रत्यक्षं किमुक्तम् ?

अथवा

'अतज्जन्यमपि तत्प्रकाशकं प्रदीपवत्' इत्यनेन किमुक्तम् ?

**अथवा**

# PS/UM-II/6/124B/18

## षष्ठपत्रम्

## बौद्धदर्शनम्

समय: घण्टात्रयम् पूर्णाङ्का: 100

अ. सर्वे प्रश्ना: समाधेया: । (20×2=40)

1. कतिविधा: पुरुषा: ज्ञेया: ?
2. बोधिपथप्रदीपकार: क: ?

**अथवा**

'बोधिपथप्रदीप: सौगतसम्प्रदायस्य ग्रन्थ:' इति कथनमिदं सत्यम् असत्यं वा ?

3. समन्तभद्रचर्या का ?
4. त्रीणि रत्नानि कानि ?
5. प्रणिधिचित्तोत्पादगुणा: कस्मिन् सूत्रे प्रभाषिता: सन्ति ?

**अथवा**

कति पारमिता: सन्ति ?

6. सद्गुरु: क: ?
7. कति आर्यसत्यानि ? कानि च तानि ?

8. व्यापादः कः?

अथवा

सुगतः कः?

9. पञ्चस्कन्धाः के?

10. त्रिपिटकान्तर्गते बोधिपथप्रदीपग्रन्थोऽयं संकलितः न वा?

अथवा

बोधिप्रभः कः?

11. तथागतः कः?

12. प्रतीत्यसमुत्पादः कस्य सिद्धान्तः?

13. शीघ्रं बोधिं कः लभते?

14. नैरात्म्यद्वयं लिखत।

15. के द्वे आवरणे?

16. अतीशः कः?

17. प्रतीत्यसमुत्पादस्य कति अङ्गाः सन्ति?

18. कति आयतनानि?

19. बोधिपथप्रदीपग्रन्थः कस्याः भाषायाः मूलसंस्कृत-भाषायां पुनरुद्धारितः?

अथवा

मञ्जुश्री कः?

20. 'बोधिपथप्रदीपः' इत्यत्र 'बोधि' इत्यस्य पदे कोऽभिप्रायः?

ब. सर्वे प्रश्नाः समाधेयाः। (5×8=40)

21. बोधिपथप्रदीपस्य मङ्गलपद्यं विलिख्य तस्य व्याख्या कार्या।

22. विकल्पो हि महामोहः संसारोदधिपातकः।
निर्विकल्पसमाधिस्थो निर्मलो भाति खं यथा।
-कारिकेयं साधु व्याख्यातव्या।

अथवा

स्वपाठ्यग्रन्थात् स्वस्मृत्या श्लोकम् एकं विलिख्य (यः श्लोकः प्रश्नपत्रेऽस्मिन् नागतः स्यात्) तस्य व्याख्या स्वभाषया कार्या।

23. उत्तमपुरुषस्य लक्षणं अधीतग्रन्थदिशा प्रतिपादयत।

24. बोधिचित्ताद्धि यत्पुण्यं तच्च रूपि भवेद्यदि।
आकाशधातुं सम्पूर्य भूयश्चोत्तरि तद्भवेत्॥
-कारिकेयं साधु व्याख्येया।

अथवा

उत्तमं भिक्षुसंवरं यथाग्रन्थनयेन लिखत।

25. पुरुषास्त्रिविधा ज्ञेया. . . . .इतीमां कारिकां पूरयित्वा व्याख्या विधेया।

अथवा

शमथस्य महत्त्वं लेखनीयम्।

स. कश्चन एकः प्रश्नः समाधेयः। (1×20=20)

26. बोधिपथप्रदीपस्य विषयवस्तु किम्? विवृणुत।

अथवा

बोधिपथप्रदीपग्रन्थकारस्य देशकालकृतीनां परिचयो देयः।

अथवा

बोधिपथप्रदीपग्रन्थदिशा महायानदर्शनस्य वैशिष्ट्यं लेखनीयम्।

अथवा

# PS/UM-II/6/124C/18

## षष्ठपत्रम्

## काश्मीरशैवदर्शनम्

समयः घण्टात्रयम् पूर्णाङ्काः 100

अ. विंशति प्रश्नाः समाधेयाः। (20×2=40)

1. काश्मीरशैवदर्शनस्य अपरं नाम किम्?
2. शिवसूत्रस्य प्रणेता कः?
3. शिवस्तोत्रावलीकारः कः?

अथवा

शिवस्तोत्रावल्या अपरं नाम किम्?

4. शिवस्तोत्रावल्यां कति स्तोत्राणि सन्ति?
5. त्रिभुवनस्वामीः कः?
6. त्रिभुवनपदेन कस्य ग्रहणं भवति?

अथवा

कल्याणकारकः कः?

7. रुद्रप्रमाता कः?
8. शिवस्य स्फुरणता का?
9. साधकस्य त्रिविधः कालः कोऽस्ति?
10. महावीरः कः भवति?

11. शिवस्तोत्रावल्याः पञ्चमस्तोत्रस्य नाम किम्?

12. उत्पलदेवस्य समयः कः?

**अथवा**

काश्मीरशैवदर्शनस्य प्रथमः आचार्यः कः?

13. पराशक्तिः का?

14. गोकुलपदस्यार्थः कः?

15. चन्द्रशेखरः कः?

**अथवा**

सुमेरु कस्य नाम?

16. जीवजीवकः कः?

17. मोहः कः?

18. जटिलः कः?

**अथवा**

पूजायाः साधनसाध्ययोः भेदोऽभेदो वा?

19. शिवस्तोत्रावल्याः सप्तदशस्तोत्रस्य नाम किम्?

20. मलः कतिविधः? के च ते?

(5×8=40)

ब. सर्वे प्रश्नाः समाधेयाः।

21. जय मोहान्धकारान्धजीवलोकैकदीपकः।

जय प्रसुप्तजगती जागरुकाधिपुरुषः॥

– व्याख्या कार्या।

P.T.O.

22. रक्षणीयं वर्धनीयं बहुमान्यमिदं प्रभो। इत्यस्य वाक्यस्य शारदालिप्यां: लिप्यन्तरणं कुरुत?

अथवा

सर्वमस्य परमस्ति न किञ्चिद् वस्त्ववस्तु यदि वेति महत्या।

प्रज्ञया व्यवसितोऽत्र यथैव त्वं तथैव भव सुप्रकटो मे॥

-व्याख्या विधेया।

23. स्वसंवित्सारहृदयाधिष्ठाना: सर्व देवता:।

कदा नाथ वशीकुर्या भवद्भक्तिप्रभावत:॥

- व्याख्या कार्या।

अथवा

परमेश्वरस्योपरि टिप्पणी कार्या।

24. भक्तानां समतासार विषुवत्समय: सदा।

त्वद्भावरसपीयूषरसेनेषां तदर्चनम्॥

- व्याख्या कार्या।

अथवा

शाम्भवोपायस्योपरि टिप्पणी कार्या?

25. अधोलिखितेषु शारदालिप्याः रोमनलिप्यन्तरणं कार्या ?



एकः प्रश्नः समाधेयः। (1×20=20)

26. सर्वात्मपरिभावनाख्यं द्वितीयस्तोत्रं विशदयत ?

अथवा

आचार्य-अभिनवगुप्तस्य जीवनवृत्तं वर्णयत ?

अथवा

शैवदर्शनस्य उद्भवः कथं भवति प्रतिपाद्यताम् ?